শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমদ্ভাগৱতে দশমস্কন্ধে

# ॥ ৱেণুগীতম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ ৱেণুগীতম্ ॥

শ্রীশুক উৱাচ
ইত্থং শরৎস্বচ্ছজলং পদ্মাকরসুগন্ধিনা।
ন্যৱিশদ্ ৱাযুনা ৱাতং সগোগোপালকোঽচ্যুতঃ॥ **1** ॥

কুসুমিতৱনরাজিশুষ্মিভৃঙ্গ -
    দ্বিজকুলঘুষ্টসরঃসরিন্মহীধ্রম্।
মধুপতিরৱগাহ্য চারযন্ গাঃ
    সহপশুপালবলশ্চুকূজ ৱেণুম্॥ **2** ॥

তদ্ ৱ্রজস্ত্রিয আশ্রুত্য ৱেণুগীতং স্মরোদযম্।
কাশ্চিৎ পরোক্ষং কৃষ্ণস্য স্বসখীভ্যোঽন্ৱৱর্ণযন্॥ **3** ॥

তদ্ ৱর্ণযিতুমারব্ধাঃ স্মরন্ত্যঃ কৃষ্ণচেষ্টিতম্।
নাশকন্ স্মরৱেগেন ৱিক্ষিপ্তমনসো নৃপ॥ **4** ॥

বর্হাপীডং নটৱরৱপুঃ কর্ণযোঃ কর্ণিকারং
    বিভ্রদ্ ৱাসঃ কনককপিশং ৱৈজযন্তীং চ মালাম্।
রন্ধ্রান্ ৱেণোরধরসুধযা পূরযন্ গোপৱৃন্দৈ -
    র্ৱৃন্দারণ্যং স্বপদরমণং প্রাৱিশদ্ গীতকীর্তিঃ॥ **5** ॥

ইতি ৱেণুরৱং রাজন্ সর্ৱভূতমনোহরম্।
শ্রুৎৱা ৱ্রজস্ত্রিযঃ সর্ৱা ৱর্ণযন্ত্যোঽভিরেভিরে॥ **6** ॥

শ্রীগোপ্য ঊচুঃ
অক্ষণ্ৱতাং ফলমিদং ন পরং ৱিদামঃ

সখ্যঃ পশূননু ৱিৱেশযতোর্ৱযস্যৈঃ।
ৱক্ত্রং ৱ্রজেশসুতযোরনুৱেণু জুষ্টং
যৈর্ৱা নিপীতমনুরক্তকটাক্ষমোক্ষম্॥ 7॥

চূতপ্রৱালবর্হস্তবকোৎপলাব্জ -
মালানুপৃক্তপরিধানৱিচিত্রৱেষৌ।
মধ্যে ৱিরেজতুরলং পশুপালগোষ্ঠ্যাং
রঙ্গে যথা নটৱরৌ ক্ব চ গাযমানৌ॥ 8॥

গোপ্যঃ কিমাচরদযং কুশলং স্ম ৱেণু -
র্দামোদরাধরসুধামপি গোপিকানাম্।
ভুঙ্ক্তে স্ৱযং যদৱশিষ্টরসং হ্রদিন্যো
হৃষ্যত্ত্ৱচোঽশ্রুমুমুচুস্তরৱো যথাঽঽর্যাঃ॥ 9॥

ৱৃন্দাৱনং সখি ভুৱো ৱিতনোতি কীর্তিং
যদ্ দেৱকীসুতপদাম্বুজলব্ধলক্ষ্মি।
গোৱিন্দৱেণুমনুমত্তমযূরনৃত্যং
প্রেক্ষ্যাদ্রিসান্ৱপরতান্যসমস্তসত্ত্ৱম্॥ 10॥

ধন্যাঃ স্ম মূঢমতযোঽপি হরিণ্য এতা
যা নন্দনন্দনমুপাত্তৱিচিত্রৱেষম্।
আকর্ণ্য ৱেণুরণিতং সহকৃষ্ণসারাঃ
পূজাং দধুর্ৱিরচিতাং প্রণযাৱলোকৈঃ॥ 11॥

কৃষ্ণং নিরীক্ষ্য ৱনিতোৎসৱরূপশীলং
শ্রুৎৱা চ তৎক্বণিতৱেণুৱিচিত্রগীতম্।
দেৱ্যো ৱিমানগতযঃ স্মরনুন্নসারা
ভ্রশ্যৎপ্রসূনকবরা মুমুহুর্ৱিনীৱ্যঃ॥ 12॥

গাৱশ্চ কৃষ্ণমুখনির্গতৱেণুগীত -
পীযূষমুত্তভিতকর্ণপুটৈঃ পিবন্ত্যঃ।
শাৱাঃ স্নুতস্তনপযঃকৱলাঃ স্ম তস্থু -
র্গোৱিন্দমাত্মনি দৃশাশ্রুকলাঃ স্পৃশন্ত্যঃ॥ **13**॥

প্রাযো বতাম্ব ৱিহগা মুনযো ৱনেঽস্মিন্
কৃষ্ণেক্ষিতং তদুদিতং কলৱেণুগীতম্।
আরুহ্য যে দ্রুমভুজান্ রুচিরপ্রৱালান্
শৃণ্ৱন্ত্যমীলিতদৃশো ৱিগতান্যৱাচঃ॥ **14**॥

নদ্যস্তদা তদুপধার্য মুকুন্দগীতম্
আৱর্তলক্ষিতমনোভৱভগ্নৱেগাঃ।
আলিঙ্গনস্থগিতমূর্মিভুজৈর্মুরারে -
র্গৃহ্ণন্তি পাদযুগলং কমলোপহারাঃ॥ **15**॥

দৃষ্টৱাঽঽতপে ব্রজপশূন্ সহ রামগোপৈঃ
সঞ্চারযন্তমনুৱেণুমুদীরযন্তম্।
প্রেমপ্রৱৃদ্ধ উদিতঃ কুসুমাৱলীভিঃ
সখ্যুর্ৱ্যধাৎ স্বৱপুষাম্বুদ আতপত্রম্॥ **16**॥

পূর্ণাঃ পুলিন্দ্য উরুগাযপদাব্জরাগ -
শ্রীকুঙ্কুমেন দযিতাস্তনমণ্ডিতেন।
তদ্দর্শনস্মররুজস্তৃণরূষিতেন
লিম্পন্ত্য আননকুচেষু জহুস্তদাধিম্॥ **17**॥

হন্তাযমদ্রিরবলা হরিদাসৱর্যো
যদ্ রামকৃষ্ণচরণস্পর্শপ্রমোদঃ।
মানং তনোতি সহগোগণযোস্তযোর্যৎ
পানীযসূযৱসকন্দরকন্দমূলৈঃ॥ **18**॥

গা গোপকৈরনুৱনং নযতোরুদার -
ৱেণুস্বনৈঃ কলপদৈস্তনুভৃৎসু সখ্যঃ।
অস্পন্দনং গতিমতাং পুলকস্তরূণাং
নির্যোগপাশকৃতলক্ষণযোর্ৱিচিত্রম্॥ **19**॥

এৱংৱিধা ভগৱতো যা ৱৃন্দাৱনচারিণঃ।
ৱর্ণযন্ত্যো মিথো গোপ্যঃ ক্রীডাস্তন্ময়তাং যযুঃ॥ **20**॥

॥ ইতি ৱেণুগীতং সমাপ্তম্॥